RKMVU/DSS/Int MA/12-17/D2016/UT-2/SK-126

# SK–126 श्री.भ.गीता.१५तः१८ अध्यायाः

**कालावधिः - होरा** **दिनाङ्कः 07-11-2016** **पूर्णाङ्काः - 25**

## A.यथाभाष्यम् अष्टानाम् एकेन वाक्येन समाधानं लिखत। 1*8=8

1. भगवत् तत्त्वज्ञाने कस्य अधिकारः?
2. संसारस्वरूपं किमर्थं वर्ण्यते?
3. अश्वत्थोपमितस्य संसारवृक्षस्य पर्णानि कानि?
4. अश्वत्थोपमितस्य संसारवृक्षस्य भेदः केन असिना कर्तव्यः?
5. परिमार्गणं नाम किम्?
6. 'संयोगाः...........' पूरयत।
7. अकृतात्मानः के?
8. 'गामाविश्य च भूतानि' इत्यस्मिन् श्लोके गो शब्दस्य कोऽर्थः?
9. 'पुष्णामि' इत्यस्यर्थं निरूपयत।
10. 'वेदान्तकृत्' शब्दार्थं यथाभाष्यं निरूपयत।

## B.संक्षेपेण चतुर्णां समाधानं लिखत। 4*3=12

1. कस्मात् हेतोः भगवान् अर्जुनेन अपृष्टमपि आत्मतत्वं वदति?
2. क्षराक्षरोपाधिकस्य परमात्मनः स्वरूपं यथाभाष्यं प्रदर्शयत।
3. कस्मात् हेतोः भगवान् लोके वेदे च पुरुषोत्तम इति प्रथितः?
4. वैष्णवं पदं कथं परिमार्गितव्यम्?
5. अव्ययं पदं के प्राप्नुवन्ति?

## C.एकं विशदयत। 5*1=5

1. संसारवृक्षं यथाभाष्यं वर्णयत।
2. पञ्चदशोऽध्यायस्य सारभूतं तत्त्वं विशदयत।
3. परमात्मा विश्वं कथं धारयति निरूपयत?

RKMVU/DSS/Int MA/12-17/D2016/UT-2/SK-132

# SK–132 ब्रह्मसूत्रे (1 अध्याये 3,4 पादौ)

**कालावधिः - होरा** **दिनाङ्कः 05-11-2016** **पूर्णाङ्काः - 25**

## A.यथाभाष्यम् अष्टानाम् एकेन वाक्येन समाधानं लिखत। 1*8=8

1. वेदान्ते सृष्टिवाक्यानां तात्पर्यं कुत्र?
2. धर्मः किमर्थं जिज्ञास्यः?
3. "असन्नेव स भवति" इति श्रुतौ असत् शब्दार्थः कः?
4. बालाक्यजातशत्रुसंवादः कस्मिन् ब्राह्मणे वर्तते?
5. परिस्पन्दलक्षणं किम्?
6. "अभिध्योपदेशाच्च" इति सूत्रे अभिध्या शब्दार्थः कः?
7. उपादानं नाम किम्?
8. कार्यविषयं विगानं कस्मिन्नधिकरणे सूत्रकारः निराकरोति?
9. विगानं नाम किम्?
10. "कारणत्वेन च.........." इति सूत्रं पूरयत?

## B.संक्षेपेण उत्तरत। 4*3=12

1. "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इति सूत्रं व्याख्यात।
2. सर्वव्याख्यानाधिकरणं निरूपयत।
3. कारणत्वाधिकरणस्य पूर्वपक्षं व्याख्यात।
4. आश्मरथ्यौडुलोमि-काशकृत्स्नाद्याचार्याणां मतमुपस्थापयत।
5. जगद्वाचित्वाधिकरणस्य पूर्वपक्षं संगृह्णीत।

## C.एकं विशदयत। 5*1=5

1. ब्रह्मणः अभिन्ननिमित्तोपादानत्वं निरूपयत।
2. कारणत्वाधिकरणं संगृह्णीत।
3. जगद्वाचित्वाधिकरणस्य सिद्धान्तमारचयत।

RKMVU/DSS/Int MA/12-17/D2016/UT-2/SK-171

# SK–171 दृश्यत्वहेतुनिरूपणान्तः भागः

**कालावधिः - होरा** **दिनाङ्कः 11-11-2016** **पूर्णाङ्काः - 25**

---

## A.यथाभाष्यम् अष्टानाम् एकेन वाक्येन समाधानं लिखत। 1*8=8

1. असति अतिव्याप्तिवारणाय चतुर्थमिथ्यात्वलक्षणे कः परिष्कारः उक्तः?
2. “सदेव सोम्येदमग्र आसीत्” इति श्रुत्यर्थाभावः नञा कस्यां श्रुतौ प्रतिपादितः?
3. सद्विविक्तत्वम् इत्यत्र सच्छब्दार्थः कः?
4. प्रमाणत्वं नाम किं ?
5. विरुद्धधर्मयोः एकमिथ्यात्वे अपरसत्यत्वं कुत्र उपपद्यते?
6. व्यावहारिकमिथ्यात्वेन व्यावहारिकसत्यत्वापहारेऽपि कीदृशं सत्यत्वं तथैवावतिष्ठति?
7. एकसाधकेन अपरस्य बाध्यत्वं किं प्रयोजकम्?
8. एकसाधकेन अपरस्य बाध्यत्वं किं प्रयोजकम्?
9. एकबाधकबाध्यत्वं किं प्रयोजकम्?
10. मधुसूदनस्वामिना अद्वैतसिद्धिः कस्मिन् शतके विरचिता।

## B.संक्षेपेण चतुर्णाम् समाधानं लिखत। 3*4=12

1. दृश्यत्वहेतुविचारे पूर्वपक्षमुपस्थापयत।
2. पञ्चममिथ्यात्वलक्षणस्य समन्वयं प्रदर्शयत।
3. चतुर्थमिथ्यात्वलक्षणस्य समन्वयं प्रदर्शयत।
4. मिथ्यात्वमिथ्यात्वे नाद्वैतव्याघात इति यथाग्रन्थं प्रतिपादयत।
5. दृश्यत्वहेतुविचारे पूर्वपक्षिणा प्रदर्शितान् विकल्पान् दर्शयत।
6. मिथ्यात्वसत्यत्वे नाद्वैतव्याघात इति यथाग्रन्थं उपस्थापयत।

## C.एकं विशदयत। 5*1=5

1. चतुर्थमिथ्यात्वलक्षणं यथाग्रन्थं विषदयत।
2. पञ्चममिथ्यात्वलक्षणं यथाग्रन्थं प्रतिपादयत।

RKMVU/DSS/Int MA/14-19/D2016/UT-2/SK-205

**SK**–205 सिद्धान्तकौमुदी अजन्तात् अव्ययान्ता

समयः - होरा पूर्णाङ्कः - 25

**A.यथाकामं दश समाधेयाः।** 1x6=6

1. दृन्भूदृम्भूशब्दयोः भेदं लिखत।
2. तृज्वत्क्रोष्टुः इत्यत्र कीदृशमान्तर्यं स्वीकृतम्।
3. गोतो णित् इति सूत्रस्य अर्थं लिखत।
4. विभाषा द्वितीयातृतीयाभ्यामिति सूत्रं त्यक्तुं शक्यं कथम्।
5. विभाषा दिक्समासे बहुव्रीहौ इत्यत्र कीदृशः दिक्समासः।
6. ग्लावमित्यत्र औतोऽम्शसोः इत्यस्य प्रवृत्तिः कथं न।
7. याडापः इत्यस्य कः अर्थः।

**B.यथेच्छं पञ्च समाधत्त।** 3x3=9

1. नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम् इति पङ्क्तिं व्याख्यात।279
2. क्रोष्टुशब्दस्य रूपाणि लिख्यन्ताम्।
3. सर्वस्यै इति रूपं साधयत।
4. नृणामिति रूपं साधयत।

**C.यथाभिलाषं त्रयं व्याख्यात।** 5x2=10

1. ओः सुपि इति सूत्रं व्याख्यात।
2. टिप्पणी लेख्या – जरसी।
3. औतोऽम्शसोः इति सूत्रं व्याख्यात।

RKMVU/DSS/Int MA/15-20/D2016/UT2/SK-209

# SK–209 वैयाकरणसिद्धान्तकौमुदीकारकप्रकरणम्

कालावधिः - एकहोरा    दिनाङ्कः 07/11/2016    पूर्णाङ्काः - 25

## A.सप्तसु पञ्चैव समाधेयाः।    1*6=6

1. उपाध्यायात् अधीते इत्यत्र का विभक्तिः भवति।
2. प्रासादात् प्रेक्षते इत्यत्र केन पञ्चमी भवति।
3. पापात् जुगुप्सते इत्यत्र केन सूत्रेण पञ्चमी भवति।
4. शतात् बद्धः इत्यत्र केन पञ्चमी विभक्तिः भवति।
5. स्तोकेन मुक्तः इत्यत्र केन तृतीया विभक्तिः भवति।
6. षष्ठी हेतुप्रयोगे इत्यस्य किमुदाहरणम्।
7. केन निमित्तेन वसति इत्यत्र केन तृतीया भवति।
8. ज्ञानाय निमित्ताय इत्यत्र केन चतुर्थी विभक्तिः।

## B.त्रयं समाधत्त।    3*3=9

1. भीत्रार्थानां भयहेतुः इत्यस्य व्याख्यां कुरुत।
2. वारणार्थानामीप्सितः इत्यस्य व्याख्यां कुरुत।
3. विभाषा गुणेऽस्त्रियाम् इत्यस्य व्याख्यां कुरुत।
4. जनिकर्तुः प्रकृतिः इति सूत्रस्य व्याख्या कार्या।
5. षष्ठी हेतुप्रयोगे इति सूत्रस्य व्याख्या कार्या।

## C.द्वयं समाधत्त।    5*2=10

1. ध्रुवमपायेऽपादानम् इति सूत्रस्य व्याख्या कार्या।
2. शेषे षष्ठी इति सूत्रस्य व्याख्या कार्या।
3. पृथग्विनानानाभिस्तृतीयान्यतरस्याम् इत्यस्य व्याख्या कार्या।
4. दूरान्तिकार्थेभ्यो द्वितीया च इत्यस्याशयं लिखत।

RKMVU/DSS/Int MA/13-18/D2016/UT2/SK-215

# SK–215 सिद्धान्तकौमुद्यां स्त्रीप्रत्ययप्रकरणम्

कालावधिः - एकहोरा    दिनाङ्कः 13/11/2016    पूर्णाङ्काः - 25

## A.सप्तसु पञ्चैव समाधेयाः।    1*5=5

1. मनोः स्त्री इत्यर्थे कति रूपाणि भवन्ति।
2. अरण्यानी इति शब्दस्य कोऽर्थः।
3. यवनानी इत्यस्य कोऽर्थः।
4. दाक्षी इत्यत्र कः स्त्रीप्रत्ययः।
5. पङ्गू इत्यत्र कः स्त्रीप्रत्ययः।
6. वैदी इत्यत्र कः स्त्रीप्रत्ययः।
7. यवानी इत्यस्य कोऽर्थः।

## B.त्रिषु द्वयं समाधत्त।    5*2=10

1. वृषाकप्यग्निकुसितकुसिदानामुदात्तः इत्यस्य सोदाहरणं व्याख्या कार्या।
2. पुंयोगादाख्यायाम् इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
3. सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः इत्यस्य सोदाहरणं व्याख्या कार्या।

## C.द्वयोरेकं समाधत्त।    1*10=10

1. स्वाङ्गलक्षणं विस्तरेण प्रस्तूयताम्।
2. जातिलक्षणं सविस्तरं प्रतिपाद्यताम्।

RKMVU/DSS/Int MA/12-17/D2016/UT2/SK-225

# SK–225 वैयाकरणसिद्धान्तकौमुदीयङन्तप्रकरणम्

कालावधिः - एकहोरा  दिनाङ्कः- 5/11/2016  पूर्णाङ्काः - 25

## A.षट् समाधेयाः। 1*6=6

1. कण्ड्वादिभ्यः धातुभ्यः कस्मिन्नर्थे यक् भवति।
2. सपर इत्यस्य कोऽर्थः।
3. महीङ् कस्मिन्नर्थे वर्तते।
4. शाशय्यते इत्यत्र मूलधातुः कः।
5. नरीनृत्यते इत्यत्र णत्वं कुतो नेति।
6. चायः की इति सूत्रेण किं विधीयते।
7. गद्गद इति कस्मिन्नर्थे।
8. वाव्रज्यते इत्यस्य कोऽर्थः।

## B.पञ्चसु त्रयः समाधेयाः। 3*3=9

1. दीर्घोऽकितः इति सूत्रस्य सोहाहरणं व्याख्या लेख्या।
2. रीगृदुपधस्य च इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
3. ई घ्राध्मोः इति सूत्रस्य सोदाहरणं व्याख्या कुरुत।
4. ग्रो यङि इति सूत्रस्य सोदाहरणं व्याख्यां प्रतिपादयन्तु।
5. न कवतेर्यङि इति सूत्रस्य सोदाहरणं व्याख्या विधेया।

## C.चतुर्षु द्वयं समाधत्त। 5*2=10

1. धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रस्य व्याख्यां कुरुत।
2. यस्य हलः इति सूत्रस्य सोदाहरणं व्याख्यां लिखन्तु।
3. स्वपिस्यमिव्येञां यङि इति सूत्रस्य सोदाहरणं व्याख्यां लिखत।
4. नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् इति सूत्रस्य सोदाहरणं व्याख्यां प्रतिपादयन्तु।

RKMVU/DSS/Int MA/2016-21/UT-2/ D16-17/SK-236

# SK–236 – लघुसिद्धान्तकौमुदी अजन्तपुंल्लिङ्गान्ता

कालावधिः - एकहोरा | पूर्णाङ्काः-२५

## A.यथाकाममष्ट प्रश्नान् उत्तरत। १ x ८=८

1. सम्राट् इत्यत्र समो मस्य मत्वं केन भवति?
2. टुक् इत्यागमः आद्यावयवो भवति अन्तावयवो वा?
3. झरो झरि सवर्णे इति सूत्रस्यार्थं लिखत।
4. प्रश्नः इत्यत्र नकारस्य चुत्वं कथं न भवति?
5. न पदान्ताट्टोरनाम् इति सूत्रे टोः इत्यस्य किमर्थं ग्रहणम्?
6. तोः षि इति सूत्रस्य उदाहरणमेकं लिखत।
7. चिन्मयम् इत्यत्र अनुनासिकनकारः केन विधीयते?
8. किन्ह्नुते इत्यत्र मकारस्य नकारः केन विधीयते?
9. नृन्+पाहि= कति रूपाणि? कानि च तानि?
10. तच्छ्लोकेन इत्यत्र छत्वं केन भवति?

## B.चत्वारः समाधेयाः। ३ x ४=१२

1. पुंस्कोकिलः इति रूपं साधयत।
2. स्तोः श्चुना श्चुः इति सूत्रं सोदाहरणं व्याख्यात।
3. शश्छोऽटि इति सूत्रस्य व्याख्यानं कुरुत।
4. झयो होऽन्यतरस्याम् इति सूत्रं यथाग्रन्थं व्याख्यात।
5. ड़ः सि धुट् इति सूत्रं व्याख्यायताम्।
6. प्राङ्क्षष्ठः इति रूपं साधयत।

## C.यथाच्छन्दमेकमुत्तरत। ५ x १=५

1. नश्चापदान्तस्य झलि इति सूत्रं व्याख्यात।
2. नॄः पाहि इति रूपं साधयत।

☆☆☆☆☆

RKMVU/DSS/Int MA/16-21/D2016/UT2/SK-236 WW

# SK–236 लघुसिद्धन्तकौमुदी अजन्तपुंलिङ्गान्ता

**समयः-होरा** **पूर्णाङ्कः-२५**

## A.दश समाधेयाः। १*१०=१०

1. ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रे ढ्रलोपे इति पदस्य कोऽर्थः।
2. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इति सूत्रस्य अर्थो लेख्यः।
3. विप्रतिषेधः कः।
4. हलि सर्वेषाम् इति सूत्रस्यार्थः कः।
5. विसर्गस्य विसर्गः कदा।
6. शश्छोऽटि इति सूत्रस्य अर्थं लिखत।
7. झरो झरि सवर्णे इति सूत्रस्य अर्थं लिखत।
8. तस्मादित्युत्तरस्य इति सूत्रस्य अर्थं लिखत।
9. उत्थानमित्यत्र पूर्वसवर्णविधायकं सूत्रं किम्।
10. नकारस्य मकारस्य च अनुस्वारविधायकं सूत्रं किम्।
11. स्तोः श्चुना श्चुः इति सूत्रस्य अपवादसूत्रं किम्।
12. झयो होऽन्यतरस्याम् इति सूत्रस्य अर्थं लिखत।

## B.अन्यतरत् साधनीयम्। ५*१=५

1.रामात्, 2. सर्वेषाम्

## C.अन्यतरद् व्याख्येयम्। १०*१=१०

1. स्थानिवदादेशोऽनल्विधौ, 2. अड्कुप्वाङ्नुम्व्यवायेऽपि

RKMVU/DSS/Int MA/UT2/13-18/D2016/SK-255

# SK–255 (परिभाषेन्दुशेखरे आदितः पञ्चाशत् परिभाषाः)

समयावधिः-एकहोरा | सत्रम् ७ | पूर्णाङ्काः-२५

---

## A.दश समाधेयाः  १ x १० = १०

1. ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न इत्यत्र ज्ञापकं किम्?
2. सर्वे विधयश्छन्दसि विकल्प्यन्ते इति कथं ज्ञायते?
3. एकदेशविकृतमनन्यवत् इति कथं ज्ञायते?
4. संज्ञाविधौ प्रत्ययग्रहणे इति परिभाषा कुत्र स्पष्टा?
5. घटपटम् इत्यत्र एकवचनं कथम्?
6. अनिष्टी इति प्रयोगः सिध्यति न वा?
7. प्रकृतिवदनुकरणं भवति इति कथं ज्ञायते?
8. यत्र अर्धं तदधिकं वा विकृतं तत्र एकदेशविकृतन्यायः प्रवर्तते उत न?
9. अवतप्तेनकुलस्थितम् इति पदस्य कोऽर्थः?
10. अक्तपरिमाणं नाम किम्?
11. यस्मिन्विधिस्तदादावल्ग्रहणे इत्यस्याः परिभाषाया निमित्तं किम्?
12. प्रकृतिवदनुकरणम् इति परिभाषाया अनित्यता कथं सिध्यति?

## B.यथाभीष्टम् एकां परिभाषां व्याख्यात  ५ x १ = ५

1. यस्मिन्विधिस्तदादावल्ग्रहणे
2. उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्

## C.यथाभीष्टम् एकां परिभाषां व्याख्यात  १० x १ = १०

1. स्त्रीप्रत्यये चानुपसर्जने न
2. व्यपदेशिवदेकस्मिन्

RKMVU/DSS/Int MA/UT2/12-17/D2016/SK-257

# SK–257 (परिभाषेन्दुशेखरे अन्तिमांशः)

समयावधिः-एकहोरा सत्रम् ७ पूर्णाङ्काः-२५

---

## A. दश समाधेयाः १ x १० = १०

1. अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी - कथम्?
2. बिभर्ति इत्यत्र कथम् अलोऽन्त्यविधिः?
3. ब्राह्मणवत्सा त ब्राह्मणीवत् स च इत्यत्र कथं न एकशेषः?
4. नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे इत्यस्य कोऽर्थः?
5. अन्त्यसदेश इत्यस्य कोऽर्थः?
6. विद्ध इत्यत्र कथं न सम्प्रसारणे इति चरितार्थं कथम्?
7. आतिदेशिकमनित्यम् इत्यस्य किं फलम्?
8. गणकार्यस्यानित्यतायां किं ज्ञापकम्?
9. अनुदात्तेत्त्वलक्षणात्मनेपदिनः अनित्यता कथम्?
10. विधिनियमसम्भवे विधिरेव ज्यायान् - ज्ञापकं किम्?
11. व्यवस्थितविभाषयापि कार्याणि क्रियन्ते - फलं किम्?

## B. यथाभीष्टम् एकां परिभाषां व्याख्यात ५ x १ = ५

1. अनन्त्यविकारेऽन्त्यसदेशस्य
2. विधौ परिभाषोपतिष्ठते नानुवादे

## C. यथाभीष्टम् एकां परिभाषां व्याख्यात १० x १ = १०

1. सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य
2. प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्।

RKMVU/DSS/Int MA/12-17/D2016/UT2/SK-267

# SK–267 लघुशब्देन्दुशेखरे–कारकम्

कालावधिः-एकहोरा    दिनाङ्कः    04/11/2016    पूर्णाङ्काः-25

**A.सप्तसु पञ्चैव समाधेयाः।** 1*5=5

1. अपादानपञ्चमीविभक्तेः अर्थः कः।
2. भीत्रार्थानां भयहेतुः इति कस्यापवादः।
3. वृक्षात्पतति इति वाक्यस्य कोऽर्थः।
4. सार्थाद् हीयते इति वाक्य कोऽर्थः।
5. अन्यः इति पदस्य कोऽर्थः।
6. घटात् एकः इति साधुः असाधुः वा।
7. आयातेः कः अर्थः।

**B.त्रिषु द्वयं समाधत्त।** 5*2=10

1. वारणार्थानामीप्सितः इति सूत्रस्य व्याख्या कार्या।
2. पृथग्विनानाभिस्तृतीयान्यतरस्याम् इत्यस्य व्याख्या विधेया।
3. जनिकर्तुः प्रकृतिः, भुवः प्रभवः, इत्यनयोः व्याख्या विधेया।

**C.द्वयोरेकं समाधत्त।** 1*10=10

1. अन्यारादितरर्तेदिक्शब्दाञ्चूत्तर.......इति सूत्रस्य यथाग्रन्थं व्याख्या कार्या।
2. अन्तर्धौ येनादर्शनमिच्छति इति सूत्रस्य व्याख्या कार्या।

RKMVU/Int MA/DSS/Batch 2015-20/UT-2/D2016/SK-341

## (तर्कसंग्रहो दीपिकान्यायबोधिनीसहितः)

कालावधिः -घटी पूर्णाङ्काः - 25

**A.समाधत्त।** **1x10=10**

1. अन्यथासिद्धिः प्रतिपाद्या। 5
2. यथार्थायथार्थानुभवलक्षणयोः दोषं प्रदर्श्य दीपिकादिशा वारयत। 5
3. अयथार्थानुभवस्य मूलकारोक्ते लक्षणे न्यायबोधिनीदिशा दोषं प्रतिपाद्य समाधत्त। 10
4. असमवायिकारणं गोवर्धनमिश्रदिशा उपपादयत। 10
5. सन्निकर्षान् न्यायबोधिनीदिशा प्रतिपादयत। 10

RKMVU/DSS/Int MA/San/UT2/14-19/D2016/SK-344

# SK–344 न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डः पस्पशाह्निकं च

कालावधिः - एकहोरा दिनाङ्कः 28/7/2016 पूर्णाङ्काः - 25

## A.अष्टसु षट् समाधेयाः। 1*5=5

1. न्यायशास्त्रे देहं कतिविधम्।
2. मानुषादीनां देहं कीदृशम्।
3. जलीयं देहं कीदृशम्।
4. स्वेदजाः के।
5. वेदस्य षडङ्गानि कानि।
6. महाभाष्ये कति आह्निकानि सन्ति।
7. कस्माद् अनर्थकं माधिगीष्महीत्याह भगवान् पतञ्जलिः।
8. प्रत्यभिवादः कथं स्यात्।

## B.षट्सु त्रयं समाधत्त। 3*3=9

1. ऊहः, लघु, इत्यनयोः प्रयोजनयोराशयं प्रतिपादयन्तु।
2. असन्देहः इति प्रयोजनस्याशयं प्रतिपादयन्तु।
3. दुष्टः शब्दः इति प्रयोजनस्याशयं प्रतिपादयन्तु।
4. षड्विधस्तु रसस्तत्र इत्यस्याशयं लिखन्तु।
5. जलत्वजातिः कथं सिध्यति इति यथाग्रन्थं लिखन्तु।
6. वर्णः शुक्लः इति लक्षणस्य व्याख्या कार्या।

## C.चतुर्षु द्वयं समाधत्त। 2*5=10

1. भाष्यानुसारं शब्दस्वरूपं प्रतिपादयन्तु।
2. चत्वारि शृङ्गा इत्यादिमन्त्रं व्याख्यात।
3. तत्र क्षितिः गन्धहेतुः इत्यस्याशयं लिखन्तु।
4. इन्द्रियं घ्राणलक्षणम् इत्यस्याशयं लिखन्तु।

RKMVU/DSS/Int MA/14-19/D2016/UT2/SK-344

# SK–344 न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डः पस्पशाह्निकं च

| कालावधिः - होरा | दिनाङ्कः 08-11-2016 | पूर्णाङ्काः - 25 |
|---|---|---|

**A.चतुर्णाम् एकेन वाक्येन समाधानं लिखत।** **1*4=4**

1. म्लेच्छा मा भूम इत्यध्येयं व्याकरणम् इत्यस्य कोऽर्थः?
2. कस्माद् अनर्थकं माधिगीष्महीत्याह भगवान् पतञ्जलिः?
3. प्रत्यभिवादः कथं स्यात्?
4. रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इत्यत्र एकवचनं कथं सङ्गच्छते?
5. महाभाष्ये कति आह्निकानि सन्ति?

**B.द्वौ संक्षेपेण उत्तरत।** **2*3=6**

1. ध्वनिः शब्दः इति मतम् अन्यमतनिरासपूर्वकम् उपपादयत।
2. व्याकरणाध्ययनस्य मुख्यानि प्रयोजनानि उपवर्णयत।
3. चत्वारि शृङ्गा इत्यादिमन्त्रं व्याख्यात।

RKMVU/DSS/Int MA/13-18/D2016/UT2/SK-345

# SK–345 न्यायसिद्धान्तमुक्तावल्यामनुमानखण्डः

कालावधिः - एकहोरा　　　　दिनाङ्कः 07/11/2016　　　　पूर्णाङ्काः - 25

**A.सप्तसु पञ्चैव समाधेयाः।**　　　　**1*5=5**

1. विरुद्धस्य किं लक्षणम्।
2. बाधस्य लक्षणं लिख।
3. सत्प्रतिपक्षस्य लक्षणं लिखत।
4. साधारणस्य लक्षणं लिखन्तु।
5. कति हेत्त्वाभासाः सन्ति।
6. अनुमायां व्याप्तिज्ञानं करणमिति केषां मतम्।
7. ज्ञायमानं लिङ्गमनुमितौ करणमिति केषां मतम्।

**B.त्रिषु द्वयं समाधत्त।**　　　　**5*2=10**

1. अनुपसंहारिणः लक्षणं प्रतिपादयन्तु।।
2. सभेदम् असिद्धस्य स्वरूपं प्रतिपादयन्तु।
3. असाधारणस्य स्वरूपं प्राचीननवीनदृष्ट्या प्रतिपादयन्तु।

**C.द्वयोरेकं समाधत्त।**　　　　**1*10=10**

1. परामर्शस्वरूपं यथाग्रन्थं प्रतिपादयन्तु।
2. पक्षतास्वरूपं यथाग्रन्थं प्रतिपादयन्तु।

RKMVU/DSS/Int MA/16-21/D2016/UT-2/SK-411

# SK– 411 रघुवंशम्

कालावधिः - होरा　　　　दिनाङ्कः 08-11-2016　　　　पूर्णाङ्काः - 25

## A. एकेन वाक्येन समाधानं लिखत।　　　　1*8=8

1. अरविन्दानां परिमलः कथं शीतलो जातः?
2. धूमाः कस्य पिशुनाः?
3. दिलीपः लङ्घितमध्वानं कथं न मेने?
4. महिषीसखः इत्यत्र विग्रहं प्रदर्शयत।
5. कुत्र निषीदतो मृगान् दिलीपः ददर्श?
6. धूमाः कान् पवित्रयन्ति स्म?
7. मयूराः कथं मार्गं त्यजन्ति स्म?
8. दिलीपः यन्तारं किमादिदेश?
9. अनुकूलेन पवनेन कीदृशं कार्यद्वयं कृतम्?
10. मृगाः ऋषिपत्नीनां कानि इव?
11. धूमाः किं गन्धयुक्ताः?
12. दिलीपः वसिष्ठं कदा अपश्यत्?

## B. संक्षेपेण त्रीणि विवृणुत।　　　　5*3=15

1. परस्पराक्षिसादृश्यम्।
2. सेकान्ते मुनिकन्याभिः।
3. पुरुषायुषजीविन्यः।
4. हविरावर्जितं होतः।
5. उपपन्नं ननु शिवम्।

RKMVU/Int MA/San/15-20/D2016/UT-2/SK-413

**विषयः - अभिज्ञानशाकुन्तले आदितः चत्वारः अङ्काः**

**समयः - होरा** **पूर्णाङ्काः - 25**

## A.यथेच्छं षट् प्रश्नाः समाधेयाः 1*6 =6

1. "बहुवल्लभाः खलु राजानः श्रूयन्ते।" इति कस्योक्तिः?
2. आकाशस्य लक्षणं लिखत।
3. अनसूयाप्रियंवदे किं कर्तुं शकुन्तलादुष्यन्ततो दूरं गतवत्यौ?
4. विरहपीडिता शकुन्तला कस्याः तीरे शयाना आसीत्?
5. "अथवा सागरमुज्झित्वा कस्मिन् महानद्या प्रवेष्टव्यम्" इति कस्योक्तिः?
6. पौरव! रक्ष विनयम् – कस्मिन् प्रसङ्गे कस्योक्तिः?
7. शकुन्तलायाः प्रेमपत्रे किं लिखितमासीत्?
8. गौतम्याः परिचयं लिखत।

## B.यथेच्छं त्रयाणामुत्तरं लिखत। 3*3=9

1. "लभेत वा प्रार्थयिता न वा श्रियं श्रिया दुरापः कथमीप्सितो भवेत्" इति वचनं सप्रसङ्गं व्याख्यात।
2. "निभृतमिति चिन्तनीयं, शीघ्रमिति न दुष्करम्" इति वाक्यं सप्रसङ्गं व्याख्यात।
3. "सुन्दरि! अलं गुरुजनाद्भयेन" इति कस्य कस्मिन्प्रसङ्गे कं प्रत्युक्तिः?
4. कीदृश्यः कुमार्यो मनसिजमपि आबाधते इति कवेरभिप्रायः?

## C.विस्तरेण लिखत। 10*1= 10

1. लतामण्डपे शकुन्तलादुष्यन्तयोः एकान्तवृत्तान्तं विस्तरेण लिखत।
2. कालिदासस्य देशकालकृतिपरिचयं लिखत।

RKMVU/Int MA/San/15-20/UT2/ D2016/SK-441

# SK-441 - साहित्यदर्पणः

कालावधिः - एकहोरा | दिनाङ्कः-10.11.16 | पूर्णाङ्काः - 25

## A.वाक्येनैकेन उत्तरं लिखत। 1x10=10

1. कीदृशः स्थायिभावो रसः?
2. निर्वासनाः कीदृशाः?
3. रसपदनिर्वचनं कथम्?
4. चित्तद्रवीभावात् किं भवति?
5. रसः कुतो न प्रत्यक्षः?
6. कीदृशो धर्मः सत्त्वम्?
7. चिन्मय इत्यत्र कस्मिन्नर्थे मयड्प्रत्ययः?
8. करुणरसः आनन्दमयः इत्यत्र किं प्रमाणम्?
9. रसविषये अभिनवगुप्तपादाः किमुक्तवन्तः?
10. रसः कुतो न ज्ञाप्यः?
11. सर्वत्राप्यद्भुतो रसः, कस्य मतम्?
12. रसस्य परगतत्वे को दोषः?

## B.त्रीणि विवृणुत। 5x3=15

1. रसनिष्पत्तिं करुणादिषु आनन्दमयत्वं प्रतिपादयत।
2. साधारणीकरणं, रसास्वादे वासनाद्वयं च विवृणुत।
3. कारकव्यञ्जकयोः व्यत्यासं, दुःखकारणेभ्यः सुखोत्पत्तिं च विवृणुत।
4. सत्त्वोद्रेकादखण्ड इत्यादिकारिकाद्वयं व्याख्यात।

***

RKMVU/DSS-WW/Int MA/16-19/UT-2/SK- 521

# SK–521(संस्कृतभाषाप्रवेशः)

कालावधिः - एकहोरा　　　　दिनाङ्कः ०८.११.२०१६　　　　पूर्णाङ्काः - २५

## A.यथारुचि पञ्चदशोत्तराणि लिखत। 1*15=15

1. अदस्-शब्दस्य पुंसि द्वितीयाविभक्तेः रूपाणि।
2. अदस् -शब्दस्य स्त्रीलिङ्गे षष्ठीविभक्तेः रूपाणि।
3. वपुष् -शब्दस्य सप्तमीविभक्तेः रूपाणि।
4. यत्-शब्दस्य स्त्रीलिङ्गे तृतीयाविभक्तेः रूपाणि।
5. श्रीशब्दस्य षष्ठीविभक्तेः रूपाणि।
6. चतुर्-शब्दस्य स्त्रीलिङ्गे सर्वाणि रूपाणि।
7. त्रि-शब्दस्य नपुंसकलिङ्गे सर्वाणि रूपाणि।
8. तादृश्-शब्दस्य पुंसि द्वितीयाविभक्तेः रूपाणि।
9. गिर् -शब्दस्य सप्तमीविभक्ते रूपाणि।
10. दिव्-धातोः लङि प्रथमपुरुषे रूपाणि।
11. परस्मैपदिनः तन्-धातोः लुङि उत्तमपुरुषे रूपाणि।
12. आत्मनेपदिनः दीप्-धातोः लिटि मध्यमपुरुषे रूपाणि।
13. रुध् -धातोः लोटि प्रथमपुरुषे रूपाणि।
14. परस्मैपदिनः क्री-धातोः लटि उत्तमपुरुषे रूपाणि।
15. अस्-धातोः लङि प्रथमपुरुषे रूपाणि।
16. परस्मैपदिनः तन्-धातोः विधिलिङि मध्यमपुरुषे रूपाणि।
17. रुध्-धातोः लङि उत्तमपुरुषे रूपाणि।
18. परस्मैपदिनः क्री-धातोः लुङि प्रथमपुरुषे रूपाणि।

## B.यथेच्छं दशप्रश्नानाम् उत्तरं लिखन्तु। 1*10=10

1. दयालुः रामः कोपवन्तं रावणं हत्वा अयोध्यां गच्छति। (कर्मणि परिवर्तयत)
2. अयोध्याधिपतिना रामेण बाणेन हतो किष्किध्याधिपतिः वाली। (प्रयोगपरिवर्तनं कुरुत)
3. भगवन् कृष्ण सर्वम् अहं अर्जुनः एतत् ऋतं मन्ये। (कर्मणि लिखत)
4. भक्तः प्रतिदिनं कृपालुं देवं वन्दितुं मन्दिरं प्रविशति।(मनस्-योगेन परिवर्तयत)
5. रामानुजः भरतः भरतज्येष्ठं रामं द्रष्टुं वनं गच्छति। (निमित्तशब्दयोगेन परिवर्तयत)।

6. सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्। (कृद्योगेन परिवर्तयत)
7. कृष्ण सीदन्ति मम गात्राणि मुखं च परिशुष्यति।( वाच्यपरिवर्तनं कुरुत)
8. यदा सीता वदन्ती आसीत् तदा रामः सीताम् अपश्यत्। (क्तप्रत्यययोगेन सरलवाक्येन लिखत)
9. पुरा महर्षिः पाणिनिः कदा व्याकरणस्य बहून् ग्रन्थान् प्रणीतवान्। (प्रयोगपरिवर्तनं कुरुत)
10. सुकण्ठकाः गायकाः सुमधुरेण कण्ठेन श्लोकानां गानार्थम् अभ्यासं कुर्वन्ति। (तुमुन् प्रत्यययोगेन वाक्यं लिखत)
11. मङ्गलवासरे कलिकातास्थः धनवान् गोपः मन्दिरात् दुग्धवतीं धेनुं नयते। (शानच्-प्रत्यययोगेन परिवर्तयत)
12. नदीतीरे भगिनीभिः फलानि लभ्यन्ते। तानि पक्वानि सन्ति। (शानच्-प्रत्यययोगेन एकवाक्येन लिखत)
13. भगवान् शिवः विषम् पिबति। (शतृप्रत्यययोगेन परिवर्तयन्तु)